শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রী অয্যা দেৱনাথ তাতদেশিকন্ ৱিরচিতং

# ॥ শ্রী জম্বূপুরনিৱাস শ্রীনিৱাসস্তোত্রম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী জম্বূপুরনিৱাস শ্রীনিৱাসস্তোত্রম্ ॥

শ্রীনিৱাসায মহতে পুরুষায নমো নমঃ।
যতঃ সর্ৱমিদং জাতং স্থিতমন্তে প্রলীযতে ॥ **1** ॥

সরসি সরসিজার্থং ন্যস্তপাদে গজেন্দ্রে
গ্রসতি মহতি নক্রে ঘুষ্যমাণে নিদানে।
সপদি গরুডৱেগাৎ যস্তমেত্যাভ্যরক্ষৎ
স হরিরৱিতুমস্মান্ জম্বুধাম্ন্যাৱিরাসীৎ ॥ **2** ॥

স হরিরুরসি লক্ষ্মীং হস্তযোঃ শঙ্খচক্রে
করমধিকটি ৱামং দক্ষিণে দানমুদ্রাম্।
তদধিকমনোজ্ঞঃ ত্রাতুমদ্যাপি তিষ্ঠন্
ভৱ শরণমিহেতি প্রার্থনাং প্রেক্ষতে নঃ ॥ **3** ॥

তদুষসি নিজতল্পাদুত্থিতৈরাশু সর্ৱৈঃ
সরসি ৱিহিতসান্ধ্যৈরালযং তস্য গৎৱা।
পরিগতিনতিপূর্ৱং প্রার্থ্যতাং তত্তদিষ্টম্
তদনু স ৱিতরেদ্ৱঃ সর্ৱমিষ্টং ৱদান্যঃ ॥ **4** ॥

সকৃদুদিতমেতৎ হৃদ্যপদ্যত্রযং যঃ
পঠতি স শমিতাদ্যঃ ত্যক্তরাগস্ত্রিৱর্গে।
স্ৱকৃতসুকৃতভূম্না সাভিলাষোঽপৱর্গে
পরমপুরুষভক্ত্যা প্রাপ্নুযাৎ ব্রহ্মলোকম্ ॥ **5** ॥

ইতি মহদুপসত্ত্যা জাতযা তত্ত্বমত্যা
পরমহিতমৱোচৎ সঙ্গ্রহং দেৱনাথঃ।
স্বমহিমকথনেনানেন সর্ৱান্তরাত্মা
ৱিমলগুণপযোধিঃ প্রীযতাং শ্রীনিৱাসঃ॥ **6**॥

॥ শ্রী জম্বূপুরনিৱাস শ্রীনিৱাসস্তোত্রং সমাপ্তম্॥